# अङ्गारनूपुरम्

मूलकविः

प्रभावर्मा

विवर्तकः

एन्. वि. पि. उणित्तिरि

# I आमुखम्

शिरसो दुग्धपात्रं तु पतितं भिन्नमप्यभूत्।

तथापि नयने ते न किञ्चित् पूरितमाविलम्।। १।।

दुग्धविक्रयशीले! ते गर्वं नेत्रगतं न च ।

म्लानमासीदहो! स्वल्पमात्रमप्यतिसुन्दरि! ।। २।।

तवाधरे किं तृप्तिः स्यात् पादाधस्तृणविस्तृतेः ।

क्षीरधारापारणा च कृतेति चरितार्थता? ।। ३।।

झटित्यङ्गुलिशब्देन त्वं सद्विद्युल्लतायिता ।

वातेरिता विफलपर्णायितासिलतायिता ।। ४।।

कुत्र गच्छसि चोदासीनतया त्वोष्ठवक्रताम् ।

कृत्वा शब्दायमानेन दुग्धार्द्रवसनाञ्चलम्? ।। ५।।

भङ्ग्या काञ्चीपदं कृत्वा स्वाङ्गसङ्कोचनेन च।

कुत्र गच्छसि चोदासीनतयाऽत्र यथागता? ।। ६।। युग्मकम्।।

तदापि तु त्वदोष्ठात्तन्मन्दहासो न नश्यति।

वीचीमाला च नयनान्नापगच्छति सा परम्।। ७।।

वातवीच्या समं चात्रैवागता किमतश्च किम्?।

अत्र गेहं स्थापयित्वा कुरुषे कालयापनम्?।। ८।।

न जानामि भृशं त्वं का? नास्ति भेदाऽत्र कश्चन।

जानामि त्वां शृणोमि त्वामतः सन्तृप्तिमाप्नुयाम्।। ९।।

दुग्धं विक्रीय नाण्येन धनमाप्य दिनं प्रति।

कुटीं प्राप्नोषि नारी त्वं, जानामि त्वां सहोदरीम्।। १०।।

अन्धकारवृकक्रोधभीत्या सायन्तने प्रियाम्।



कुटीं प्राप्नोषि नारी त्वं, जानामि त्वां सहोदरीम्।। ११।।

सत्यमेतज्जीवितायोधनं ते क्लेशपूरितम्।

तथापि क्षीरपात्रस्य ध्वंसान्मन्दस्मितं कथम्?।।१२।।

त्रिलोकीमप्यवज्ञाय कटाक्षाभासनाटकात्।

स्थिते सति कथं गच्छस्यकस्मात् त्वं सहोदरी।। १३।।

न किञ्चिदुत्तरं दत्वा विद्युन्नारी ततो गता।

मयि पश्यति सम्भ्रान्तिविस्मयाकुलचेतसा।। १४।।

तन्मन्दहासप्रौज्ज्वल्यं क्षीरार्द्रे मृदि दृश्यते।

दुग्धदूर्वाशिरस्यस्ति तन्मनःसत्यसन्धता।। १५।।

अर्धाधिकचतुर्विंशत्यनया वत्सराण्यहो!।

श्रावणं भुक्त,मद्यापि कौमारं भासते नवम्।। १६।।

तन्मुखे दृश्यते दीप्तिर्विषुदीपगता शुभा।

समावृतं शरीरं च तथैव किल शोभनम्।। १७।।

दृष्टे सति कदाचिन्न दृष्टं कार्यमिदं ध्रुवम्।

श्रुते सति कदाचिन्न श्रुतं कार्यमिदं ध्रुवम्।। १८।।

यदि लोकैरूह्यमिति न किञ्चित् कार्यमत्र तु।

कार्यकारणयोर्बन्धो जीविते कश्चिदस्ति वा?।। १९।।

दुग्धपात्रं तु शिरसः पतितं भिन्नमप्यपि।

दुग्धविक्रयकारिण्या नेत्रे किं न च पूरिते?।।२०।।

★

## II रावणेन कृत्तपक्षः पक्षी

कुरवस्त्री यया शुक्या चित्रस्यादानमाप्यते।

अस्या विधिस्तु को वेति केयं नारीति चोच्यताम्।।२१।।

कथञ्चित् कोमळं पत्रमचलित्वा शुकी स्वयम्।

अवतार्यालयाद् वेगात् तत्रैव च गता द्रुतम्।। २२।।

दूरस्थमेघकावासीद् विस्तृतं बाष्पसङ्कुलम्।

मौनगर्भेषु सर्वत्र दृश्यतेऽनलपर्वताः।। २३।।

पुनराह शुकीं तत्र कुरवस्त्रीरिहाददः।

चित्रमेकं; नाददाना शुकी सा निश्चलं स्थिता।। २४।।

बहिश्चर्मापगमने बहिर्लोकं च पश्यति।

अन्तर्हिता शुकशिशुर्बहिर्लोकदिदृक्षया।। २५।।

गभीरमौनावरणविच्छेदे पदसंहतिः।

पक्षपातात् समुत्थानं करोत्युन्मेषपूर्वकम्।। २६।।

तथाप्युज्ज्वलति स्मात्र कुरव्या हृदि पर्वतः।

अग्निमांश्च तदुद्गारो बहिरागाच्छनैः शनैः।। २७।।

दुग्धनष्टे परीहास एव संसेव्यते तया।

तस्या हि जीवितस्यैव क्षीरपात्रं भिदाकृतम्।। २८।।

लोकोऽपश्यद्धि दुग्धस्य नष्टमेव तु भूयशः।

अस्ति वा जीवितस्योपर्येव दुग्ध-घटौ तथा?।। २८।।

कुरवस्त्री यदा वाचःसम्पुटे पातिते सति।



चित्रमेकैकमादत्ते शुकी तात्पर्यपूर्वकम्।। ३०।।

न तस्या दृष्टियुगळं पतितं चित्रसञ्चये।

अन्तराळेऽग्निरचितं चित्रं सर्वत्र दृश्यते!।। ३१।।

अनादत्तं जीवितस्य वर्णमाराच्छुकस्त्रिया।

अङ्गारेण तथा वाचि कुरव्या सुदृढीकृतम्।। ३२।।

शुकस्त्री चित्रमेकं च पुरश्चिक्षेप, तत्र तु।

रावणप्रभुणा कृत्तपक्षः पक्षी न्यपातयत्।। ३३ ।।

तप्ताग्निकणजालस्य मथनेन समं त्वसौ।

तरुणी काञ्चन कथामूचे हृन्मथनक्षमाम्।। ३४।।

★

### III कुरवनार्या उक्ता कथा।

अस्ति राज्यं महत् तत्र राजा कश्चिद् रथाधिपः।
सप्ताश्वैर्नीयते यानं कुलमुद्राविभूषितैः।। ३५।।
तस्याशा वर्धिता कस्याञ्चन, सा मनसा वृता।
अन्येन, निष्कलङ्कासीदसौ प्रणयसंभृता।। ३६।।
तत्कुट्यां भक्षणार्थं न धान्यं सन्तृप्तिपूर्वकम्।
शयनं चाप्यसन्तृप्तं वृष्टिपातान्निरन्तरम्।। ३७।।
क्रूरकर्किटके तत्र सर्वत्र व्याप्यतेऽन्धता।
तथापि किरणः कश्चिदुत्थितो विधिकल्पितः।। ३८।।
आम्रवृक्षावृतायां च लतायामभवत् सुमम्।
घोरग्रीष्माच्च वर्षाष्च परमेतत् सुखप्रदम्।। ३९।।
तयोस्त्वभूत् सुतः कश्चिददतिदारिद्र्यनामके।
पङ्के विकसितं पद्मकुड्मळं सुमनोहरम्।। ४०।।
उद्यत्पौर्णमितुल्यं स पुष्टिमाप यथोचितम्।
प्रसूतिकाचिकित्सापि पूर्तिमाप यथाविधि।। ४२।।
ततःपरं पुनरपि तस्यां राज्ञोऽभवद् रतिः।
न सस्यं शक्तिमदपि वारणाय महाद्रुमम्।। ४३।।
राजाज्ञा यदि नार्यां च पतिता तर्हि शासनम्।
स्वाधिकारं प्रयुञ्जीत, तत्र नास्ति हि संशयः।।४३।।
तस्या भर्त्तापराधीति बद्धः कारागृहे द्रुतम्।
कोऽपराध इति ज्ञातं न कस्याप्यस्ति किञ्चन।। ४४।।



बन्धुबन्धज्ञानहीनः स कारागृहं प्रति।
जीवितं नीतवानन्ते राज्यभ्रष्टोऽप्यभूत् क्रमात्।। ४५।।
यज्ञं सर्वं देवतानां, रत्नं सर्वं स्वकीयकम्।
इति राज्ञां जीवितस्य तत्वमेव हि भूतले।। ४६।।
ततः सा तु समानीता तरुणी नृपमन्दिरे।
सर्वत्र मंगलारावाश्चाचाराारतिजालिकाः।। ४७।।
तस्यास्तनूजस्य पुरप्रवेशानुमतिर्न हि - ।
राजाज्ञा चानुसर्त्तव्या; सा प्रजास्वेकभामिनी!।।४८।।
ज्वाराग्निशयने क्रन्दमानं स्वीयकिशोरकम्।
सन्त्यज्यागत्य मातुस्तदन्तर्ज्वलति पावकः!।। ४९।।
देशे तस्मिन्नभूद् वृष्टिदुरितं घोरमारकम्;
अनया ज्ञातमस्मिन् स्वपुत्रस्य मृतिवाचकम्!।। ५०।।
नेत्रेणान्त्यारतिं तप्तदृष्ट्या तदुदतर्पणम्।
द्वयमेतन्न समभूदन्ते विधिवशादहो!।। ५१।।
कस्मिंश्चिद्दिवसे नूत्नरत्नदीपोज्ज्वलत्पुरे।
मन्दिरे नृपतिस्तस्यै ददावर्धासनस्थितिः।। ५२।।
सपत्नीषु बभूवासौ राज्ञी च तदनन्तरम्।
ददौ नृपालकः पट्टमहिषीस्थानमप्यहो!।।५३।।
अहोरात्रं सञ्चरणस्वातन्त्र्यं, सम्प्रविश्य च।
यत्रकुत्राप्यास्वदनं, सुसाध्यं महिषीमणेः।। ५४।।
कोशस्य कुञ्चिकैका तद्वशे स्यादिति निश्चितम्;
सर्वत्र परिचाराय सखीवृन्दं च दृश्यते।। ५५।।

कुलचिह्नाधिकारादिप्रतापाश्च समेऽप्यहो!।
नमश्चक्रुः पुरोभागे नियतं महिलामणेः।। ५६।।
कोशस्य कुञ्चिकैका तद्वशे स्यादिति निश्चितम्;
सर्वत्र परिचाराय सखीवृन्दं च दृश्यते।। ५७।।
घनरात्र्याश्चान्धकारावरणे नश्यति क्रमात्।
राज्ञस्तस्यां शिशुः कश्चित् जज्ञे सन्तुष्टिकारकः।। ५८।।
पुरः सर्वो वर्त्तिकाभिः शोभते ह्यरुणारुणम्;।
तारामण्डलमध्यस्थः पूर्णचन्द्रः प्रकाशते।। ५९।।
मधुवन्माधुरीलोलं बाललाळनगीतकम्।
श्रूयते; सुरसौन्दर्यज्वालया पुपुषे परम्।। ६०।।
सर्वत्र पुष्टिर्वृद्धिश्च कारुण्यं च प्रदृश्यते।
तस्यास्तु रोदनं कर्त्तुमपि कालो न लभ्यते।। ६१।।
तथाप्यसौ क्रन्दते स्म निश्शब्दं निस्सहं मृदु।
यदाकदाचि,न्नेत्राश्रुपूरितं चान्तरंगकम्।। ६२।।
अहोरात्रं ग्रीष्मवर्षावेवं यातो यथक्रमम्।
कालस्य रथचक्रं च ववृते विधिपूर्वकम्।। ६३।।
एकस्मिन् दिवसे स्वापे वर्णस्वप्नेन सा शनैः।
तीरं गता, कश्चिदृषीर्दयावान् तां शिरस्पृशा।। ६४।।
अनुजग्राह - पुत्रस्ते दीर्घायुष्मान् भविष्यति;
एतद्वरप्रदानाय देवोऽत्रार्थ्यागमिष्यति।। ६५।।
ततः प्रभृति सा भिक्षुं प्रतीक्ष्य तु कवाटकम्।
विवृतं च चकारात्र पुरस्य हृदयस्य च।। ६६।।



बहून् दिनांश्च परतो नवसिंहप्रभातके।
आगतो वटुरेकोऽत्र विवशो यात्रया परम्।। ६६।।
ततः शीघ्रं संविवृतो कवाटानां च सञ्जयः;
विनयेन नयेनाशु विवव्रेऽन्तःकवाटकम्।। ६७।।
पार्श्वद्वये च सोपानस्योपविष्टावुभावपि - ।
एको वटुः, परा राज्ञी  पश्यतश्च मुखामुखम्।। ६८।।
साञ्जलिस्तां तु भिक्षार्थं ययाचे श्रीयुतो महान्।
तत्पूर्वमेवाश्रुबिन्दुस्तस्यां पूर्णतयाभवत्।। ६९।।
किं क्रन्दसीति सहजकौतुकादक्षि सा शनैः।
उन्मुखं तन्मुखे चक्रे नीराजनविधिक्रमम्।। ७०।।
सूर्यचन्द्रावुभौ कांस्यतालतुल्यमुपर्यधः।
स्थिते सति शशाङ्केन कृतं मुखनिपातनम्।।७१।।
अर्धेण निमिषेणैव तावन्योन्यमजानताम्;
निष्कलङ्के मानसे तन्मुखमागत्य संस्थितम्।। ७२।।
अन्योन्यं पश्यतो नेत्रे, विविच्य हृदयं पुनः।
जानीते हृदयं, नेत्रे नेत्रे च चकितं क्रमात्।।७३।।
चोद्यं - "कुतो वा देशेऽस्मिन्नागता"ऽ,स्युत्तरं पुनः।
"यतः कुतो वास्तु, लक्ष्यमिदमेव न संशयः"।। ७४।।
"सौख्यं कि"मिति चोद्यस्य, "जीविते किन्नु शिष्यते।
सौख्य"मित्युत्तरं तप्तं; पुनरुचे वचः परम्।।७५।।
तापसन्तप्तमज्ञातमन्तरंगे क्वचित् स्थितम्।
वचोरूपं प्राप्य बहिर्जगाम च कथञ्चन-।।७६।।

राज्यभ्रष्टस्य सीमाया यदिहागमनं मम।
त्वद्दर्शनं प्रतिगममित्येवेति निबोध्यताम्"।।७७।
न चाञ्चल्यं मारुतस्य, पर्णानां चलनं न च;
उत्पतत्यनयोर्मध्ये पदषट्पदजालकम्।।७८।।
"अलं, गच्छामी"ति यात्रोद्युक्तं स्वप्रियमाह सा-
"सहयात्रां करिष्यामि यत्रकुत्रापि वाप्यहम्"।।७९।।
"तन्मास्त्व,स्मिन् पुरे त्वं च ससुखं वस, किन्तु मे।
अलक्ष्ययात्रैव विधिर्लोकेऽत्रानाथवत् परम्!।।८०।।
राजकोपवनाग्नौ वामुभावपि शुकाविव।
चरमं प्रापयिष्याव विना दैन्येन शाश्वतम्।।८१।।
अहं ज्ञात्वा ब्रवीमीत्थं- 'तवैका सरणी, मम।
अपरा चा,नयोर्भेदः स्वाभाविक इति स्थितिः।।८२।।
विविक्तेन प्रवाहेण स्रुतयोः सरितोः पुनः।
परस्परं मिश्रणं न सुकरं परितःस्थितौ।।८३।।
जानासि किं? क्षितौ गूढं वहत्येव सरस्वती;
आविर्भावो न तस्यास्तु समाह्वानेऽपि कुत्रचित्"।।८४।।
विविधेषु तलेष्वस्य गमनोपायचिन्तनम्;
प्रतिबन्धविचारेण सापि तिष्ठति सोत्सुका।।८५।।
"मृत्युरस्त्विति वा मृत्यु,रन्तरा यन्मनो न चेत्।
अलक्ष्यभ्रमणाद् भूमौ मृतिस्तु शरणागतिः।। ८६।।
गात्रस्य जीवितादूर्ध्वं नूनं जीवस्य जीवितम्;
योगस्तत्रावयोर्मध्ये भविष्यति न संशयः"।।८७।।



"अतोऽपि जीवितं शिष्टं भवेत् तर्ह्यावयोस्तथा।
भजिष्यावो हि मृत्युश्चेन्मृत्युरप्युभयोर्द्वयोः!" ।।८८।।
दृढेन मनसा तस्यामेवं वदति, सोऽापि न।
शक्नोति प्रतिवक्तुं तदुत्तरं तु कथञ्चन।।८९।।
गमनस्य मुहूर्ते तदागते तरुणारुणः।
अबोधपूर्वमूचे स- "यथा भवतु चेत्तथा! ।।९०।।
वसन्तपञ्चमितिथावागच्छाश्वत्थवेदिकाम्।
निशीथिनीच्छदिच्छत्रावरणे समयोचिता।। ९१।।
आगच्छ तन्मुहूर्ते यदेकतारोदयो भवेद्।
उदीक्प्रतीच्या"मित्युक्त्वा विनयेनाञ्जलिं ददौ।।९२।।
तस्य गन्तुं मार्गमथ निन्युः सेनाभटास्तथा।
अगतिं तं प्रियतममनूत्पतति साप्यहो!।।९३।।
अन्ततो धरणेर्बोधरश्मिनाळो दिवंगतः;
चरराशिः सुषुप्त्यन्धकारे निपतितः स्वयम्।।९४।।
काचिदेव न सुष्वापः; काचिद् राज्ञी मनोहरी;
अस्या नेत्रे दुःखपूर्णभयधूमिलता किमु?।।९५।।
जाने, न कश्चिद्रन्ध्रोऽत्र भविष्यति कदाचन;
न विध्यति प्रकाशं हि निशाया मेषकंबळम्।।९६।।
अयं राजात्मविस्मृत्या सुखं स्वापे निमज्जति;
निद्रानिलीनाः समतां भजन्ते सर्वजीविनः।।९७।।
निद्रायां नवरत्नाभमहामण्डपशिल्पकम्।
कुटी च किं समं? राजा पतितस्य समो भवेत्।।९८।।

न कश्चित् प्रतिबन्धोऽस्ति रात्रौ गमनकर्मणि;
अन्धकारे दिवा चापि गोपुरस्य न बन्धनम्।। ९९।।
गमनागमनेऽस्याश्च सर्वस्वातन्त्र्यदायकः।
नृपो यदा सुष्वपते तदान्धतमसावृते।।१००।।
जगाम सा विहाय स्वतनूजं नृवरान्तिके;
सुतमाच्छादितुं पट्टवस्त्रमादातुमिच्छति।।१०१।।
तदा दीपश्च जज्वाल, दृश्यते रत्नतल्लजः;
उत्तिष्ठति स्म राजा स्वनिद्राया झटिति प्रभुः।।१०२।।
रत्नस्य वर्णकिरणं दृष्टौ निपतिता न किं?।
क्षितौ पतितखड्गस्य श्रुतो वा किल्किलारवः?।।१०३।।
जगर्ज नृपतिस्तूच्चैस्तामित्थं "कुत्र गच्छसि।
अन्धकारेऽत्र?" - तरसा सा जघानासिना नृपम्।।१०४।।
तदन्तरेऽसिलतया सुतोऽपि निहतोऽभवत्;
गत्यन्तरं विना चौतत्सर्वसंभवसञ्चयः।।१०५।।
प्रकृतिक्षोभजन्येन गिरिजाम्बुप्रवाहवत्।
दृढाच्च धनुषो मुक्तशरवत् सा विलोभकम्।।१०७।।
अन्तःपुरं पुरं चापि विहायावततार हि;
कवाटोद्घाटनं कृत्वा लीयते ध्वान्तसंहतौ।।१०८।।

★



## IV अश्वत्थवेदिकायां संगमः।

भयङ्करनिशा तत्र प्रतीच्यां दिशि पार्श्वके
नक्षत्रमुदितं; कालो ह्ययमेवेति निश्चितम्।।१०८।।
सोपानेभ्योऽवतीर्णा सा दुर्गातिक्रमणात् परम्।
प्रकम्पनसमा प्राप क्रमेणाश्वत्थवेदिकाम्।।१०९।।
शेते तत्र प्रियः स्वस्थं गौरज्योत्स्नार्द्रनिश्यसौ।
एवं हि शान्तं शयनं कथं साध्यमनेन तु!।।११०।।
सर्वं विस्मृत्य शयनं साधितुं किं प्रयत्यते;।
सर्वत्र वैरे सैन्येन घोरेणागच्छति द्रुतम्।।१११।।
तमुत्थापयितुं सा च नमति स्म, परन्त्वयम्।
नाजानदन्धतामिस्रसमानस्वापकर्मणि।।११२।।
वामपादान्तिके पर्णे सञ्चलत्यञ्जसोरगः।
अंगुलीवेष्टनेनावततार सिकतातले।।११३।।
अंगुलीद्वयमध्ये तु दृश्यते रक्तनीलिमाः;।
तस्या आगमनात् पूर्वमप्रत्यक्षं गतस्त्वयम्।।११४।।
वेणुच्छेदसमाना सा क्रन्दमानाभवत् पुनः;।
अनन्ततायां तच्छब्दो लीयमानो बभूव च।।११५।।
एतद्वचनशेषं तु कुरव्यत्यन्तनिश्चला।
उपविष्टा मृतप्राया विमूका सा शुकीसखी।।११६।।
अज्ञातहृदके ज्ञानमप्रत्यक्षं बभूव किं?।
सर्वाश्चामृतधाराः किं मृतौ निर्लीनतां गताः?।।११७।।

★

**V प्रवाचकेनोक्ता कथा।**

विद्रुमं वसनं धृत्वा श्रीनिस्त्रिंशेन चालनम्।
कृत्वा च रक्तचामुण्डेः पुरतो नृत्तकृत्तम!।।११९।।
दिग्गजानां कृन्तनेन रुधिराक्तारुणोज्ज्वलम्।
पश्चिमाम्बरमुद्दिश्य देवाविष्टप्रवाचक!।।१२०।।
अस्थिमाला, कपालानि, कबन्धानि, नभःस्थले।
रक्तं किं व्याकुलं? चन्द्रतारकाण्यथवा किमु?।।१२१।।
उत्पतत्यन्तरिक्षान्ते श्मशानभसितेन च।
अत्यन्तनिबिडश्वेतवारिवाहश्च दृश्यते।।१२२।।
ततोऽधस्थितिमन्! कालत्रयमप्यत्र कौतुकात्।
बहुवारं वाचनेन पठनेन च कीर्तिमन्!।।१२३।।
तस्मिन् रात्रौ चान्धतायाश्चत्वरे तूपवेशनम्।
कृताया वनितायाः किं बभूवेत्यवजानसे?।।१२४।।
फालात्पतितरक्तार्द्रमधरं मृदु संस्पृशन्।
प्रवाचकस्तामुत्थाप्य वदत्यथ कथाः पुनः।। १२५।।
अस्वास्थ्ये वर्धमाने स कथाः कथयति क्रमात्;।
अथ रक्ततरङ्गोग्रवचसां च परम्परा।।१२६।।
अव्यक्तभूतं सर्वं च तथा प्रत्यागमिष्यति;।
यथौचित्यं तत्तदेव तत्र तत्र प्रशोभते।।१२७।।
प्रभातप्रायसमयो पुरी शेते, तदा तु सा।
एकाकिनी लक्ष्यबोधशून्या परवशा परम्।।१२८।।



पुरः प्रक्षेपितेवासौ सञ्चरन्ती पथालसम्।
केनचित् गूढसङ्घेन वारिता सहसा पुनः।।१२९
खड्गेन जघने तप्ततप्तरक्ताभिलाषिणा।
वक्त्रे दंष्ट्रेण चोग्रेण मृदुमांसाशिना जवात्।।१३०।।
प्रथमं सङ्घमेधावी, पश्चात् गृध्रकुलं यथा।
तस्यानुयायिनः, सा तु मर्दिता कण्टकाकुलैः!।।१३१।।
वर्णनातीतनवरत्नानां निधिशतैरलम्।
सम्पूर्णसञ्चिकाभिस्ते कश्मला जग्मुरञ्जसा।।१३२।।
अमेयमखिलं तस्याश्चाभिमानं महत्तरम्।
अपमानमहापङ्कगर्त्ते कृत्वा ततो गताः।।१३३।।
व्याकुले तद्विशालाक्षे स्तने शोणितनर्त्तनम्,
प्रभिन्नोर्वोरन्तरे तु क्षतजव्रणवेदना।। १३४।।
व्रणिते जघने कृष्णशिलायाः खरता परम्।
लघुश्वसितधाराणामन्तरा प्रतिबन्धता।। १३५ ।।
निश्चला चान्धतामिस्रगहने भीतिदायके ।
व्याप्तकण्टकशय्यायामारक्तार्द्रवपुष्मती।। १३६।।
सातिदीनं नीतवती दिनरात्रद्वयं; तदा।
पतन्ती वृष्टिरस्यां तु करुणा वर्षिता किमु?।। १३७।।
उद्यद्दिवाकरमुखं कुत्राप्याच्छादयत्यलम्;।
कृष्णमेघोऽन्धकारस्य कम्बळेनावृणोत्यहो!।। १३८।।
अवशिष्टं कूर्मचर्मसमानं तच्छरीरकम्;।
शरीरे वस्त्ररूपेण व्याप्ता रुधिरमालिका!।। १३९।।

सर्वैरवज्ञया दृष्टे शरीरे पुनरप्यथ।
स्थातुं न कुतुकाभावात् कृशीभूतासुधारणम्।। १४०।।
तदा तेन पथा गच्छन् वणिक् श्रुत्वा तदीयकाम्।
दीनहूतिं चान्धकारे तत्रागच्छत् कथञ्चन।। १४१।।
सा केति नैव ज्ञात्वा स शरीरस्य निधानके।
वेश्यालये कुत्रचिच्च नयति स्मानुकम्पया।। १४२।।
सुविदग्धचिकित्सात्र लब्धा सा फलिता जवात्।
कृष्णमेघच्छदोऽगच्छद् नवलेखा च व्यञ्जिता।। १४३।।
शुक्लपक्षनवारम्भे यथा नखकला तथा।
जायते स्म च पूर्णेन्दुत्वेन मन्दमवर्धत।। १४४।।
दिवसेषु गतेष्वत्र सा जज्वाल विलासिनी!।
क्षतं सर्वं जगामास्या गात्रमत्यन्तशोभितम्।। १४५।।
भक्ष्यस्य प्रविकासेन चाधिकाधिकमन्तरा।
आमोदो वर्धमाना स्यात् सर्वजन्तुष्वपि स्वतः।। १४६।।
एवं तत्राधिपायां स मोदः कश्चिदमेयताम् ।
प्राप्य हा! परिपूर्णत्वमागतः किल सन्ततम्।। १४७।।
अनेकेषु दिनेष्वत्र गतेषु पुरवासिनः।
जनेषु कामबिम्बत्वं प्राप्य सा वर्धते क्रमात्।। १४८।।
तस्यैव बहवो मञ्चास्तत्रागच्छन्ति नित्यशः।
सुवर्णैर्विद्रुमैः पूर्णो विद्रुतायसपेटकः।। १४९।।

★



## VI वेश्यालयगतः अतिथिः

कस्मिंश्चिद्दिवसे तत्र रथो नव्यः समागतः।
रथादवततारैको नवीनो युवसुन्दरः।। १५०।।
पूर्णतारुण्यमथितसौन्दर्याग्निकणैः समः।
पूर्णतामाप वेश्यायामेव चारुनवागतः।। १५१।।
सुरतक्रीडिते मूर्च्छातपवीचीशमे शुभे।
भावमुद्रेव सा चक्रे तन्मुखे तप्तचुम्बनम्।। १५२।।
शमिते सति सम्पूणसुरतोत्सवसागरे।
तस्याश्चित्ते पूर्ण आसीत् स्नेहस्तस्मिन् कुमारके।। १५३।।
अविचारितमेवास्या हृदयं तु द्रवीकृतम्।
सहजस्नेहवात्सल्यसुधैवेत्यप्यजानत।। १५४।।
यदा गतनिमेषाणां स्मरणेऽत्र विविच्यते।
अनुभूतस्तदानीं न रतिक्रीडासुखे रसः।। १५५।।
निधाय वक्षस्यास्यं स रुरुचे स्तनचूचुकम्।
असौ प्रस्रवति स्मैव शिशवे स्तन्यमार्द्रिता।। १५६।।
शरीराश्लेषणेनैव शयितः स निरन्तरम्।
सुततुल्यं तस्य वपुर्गाढमेवालिलिङ्ग सा ।। १५७।।
निजपुत्रसमेनैव विचारोऽभूच्च तं प्रति।
यतो हि स कनीयांश्च विंशत्यधिकवत्सरैः।। १५८।।
सान्वियेष युवानं तमित्थं प्रस्खलितैः पदैः -।
"कनीयांस्तु भवानेवं मार्गभ्रष्टोऽसि किं? कथम्? ।।१५९।।
अन्धकारमतिक्रम्य चैवं शोच्ये ह्यवस्थितौ।

पङ्कगर्ते निपतितुं किं शक्नोषि कथञ्चन? ।। १६० ।।
अजानस्त्वं स्त्रियं काञ्चित्; कालमेतत्परं त्वया।
अधर्ममार्गं हित्वा च धर्ममार्गेण नीयताम्।। १६१ ।।
मार्गभ्रंशवशादत्र निपातस्य विधास्तया।
अन्विष्यमाणे चार्द्रार्द्रं सोऽन्तरा रुरुदे परम्।। १६२ ।।
नाशृणोत् स दयापूर्वमेवंरीत्या निवेदनम्।
स्वल्पमप्यमृतोद्बोधस्वरेण हृदयङ्गमम्।।१६३ ।।
अनिर्वाच्यदयाधिक्यपूर्वकं मनसी द्वयोः।
एकमात्रां समाश्लेषं चक्रतुश्च परस्परम्।। १६४ ।।
अतः पश्चात् स वदति स्वं विधिं चित्तभेदकम्-।
जीवितस्य गतिं; जन्मविकृतिं वैचित्र्यभीकराम्।। १६५ ।।
पल्लवाङ्गुलिभिर्बालफाले संवाहयत्यलम्।
तस्य सौख्यं ज्ञातवान् स कथाः कथितवान् पुनः।। १६६ ।।
"जननं च महाराजधान्यामैश्वर्यवृद्धिः।
परन्तु तस्मिन् कार्यं न दृश्यते, नानुभूयते।। १६७ ।।
बाल्यकाले तु जननी त्वमिमं त्यक्तवत्यहो!।
जनकं मे निहत्याह जग्मुस्तमसि ते पुनः"।। १६८ ।।
यथाग्निकणजालेन सा किञ्चित् शिथिलाभवत्।
तदङगुली फालगते व्रणखण्डे पपात हा!।। १६९ ।।
नैवाह सा वचः किञ्चित्तदीयं; स तदन्तरे।
प्रत्यगच्छद्वा स, बोधवती सा परितःस्थितेः।। १७० ।।
प्रभातागमनात्पूर्वमेव सा तु चितां गता।



अस्याः शरीरमस्यां च जज्वाल श्लथचेतसा।।१७१ ।।
दृष्ट्वा तज्ज्वलदग्निं च श्रुत्वा हाहारवं च ते।
समुत्थाय कथञ्चित्तां ररक्षु,रनलो हतः।। १७२ ।।
शरीरार्धे तु दग्धेऽपि मुखं रम्यं च पूर्ववत्।
वपुस्तु दग्धं सर्वेषामवज्ञापात्रतां गतम्।। १७३ ।।
उपयोगविशून्याया रक्षणे तु पराङ्मुखी।
वेश्यालयाधिपा तां च त्यक्तुकामाभवत् क्षणात्।।१७४ ।।
कस्मिंश्चिद्दिवसे सा तामन्धकारपथेन तु।
विदूरस्थाय च ददौ दुग्धविक्रयकारिणे।। १७५ ।।
तत्रस्थविविधेष्वालयेष्वसौ क्षीरविक्रयात्।
धनसम्पादनं कृत्वा जीवितं नीतवत्यलम्।। १७६ ।।
ततःपरं न चक्रन्द सा कदाचित् कथञ्चन।
तदीयक्रन्दनं हासस्त्ववज्ञामिश्रितं बभौ।। १७७ ।।
तस्यास्तु जीवितघट एव भिन्नोऽभवत्, पुनः।
पयोघटस्य भिन्नत्वे क्रन्दनेन फलं किमु?।। १७८ ।।

★

VII **कविनोक्ता कथा।**

एकं चोद्यं सहस्राणामुन्नयं च करिष्यति।
एतादृशोपचोद्यानामुन्नयं च करिष्यति।। १७९।।
प्रवाचकस्य क्रोधश्च क्रमान्मन्दायते, तदा।
तेनोक्तं सर्वमेवान्धकारे विस्पष्टतां गतम्।। १८०।।
कृत्तपक्षः शुकी, सा च कुरवस्त्री, प्रवाचकः -।
एतैस्तु समतिक्रान्तस्तमःसोपानसञ्चयः।। १८१।।
कविः कश्चिदतिक्रम्य तमत्रागादविश्रमः।
अयुतायुतवर्षानप्यतिक्रम्य तरंगवत्।। १८२।।
भिन्नं क्षीरघटं दृष्ट्वा हसन्तीं सुन्दरीमिमाम्।
अन्तिके दर्शयामास युवा यः कविरेष तु।। १८३।।
रुदितोचितसन्दर्भे कथं हासोद्भवो भवेत्।
इदं चोद्यं कवेरस्य मुखादेव समीरितम्।। १८४।।
ततः किमभवत् - चोद्यस्यास्योत्पत्तेः पुरैव च।
कविर्वदति - साक्षी हि कविः सर्वस्य कर्मणः।। १८५।।
क्षीरविक्रयिणी स्त्री न यंम कमप्यवदत् किल।
अग्निस्फुलिंगतुल्यात्मकथोदितपरम्पराम्।। १८६।।
न ददौ ज्ञानपुञ्जं च; सन्तप्तो वेदनोद्भवः।
वेदनायाश्च वक्त्रे सा जज्वालाग्निस्फुलिंगवत्।। १८७।।
अन्तरा हृदये गर्वाविष्टहर्षोन्मदोन्मिषत्-
तप्तगन्धकगन्धं न ददावन्यस्य कस्यचित्।। १८८।।
तस्य स्फोटनमूलेन भवेदन्येद्युकाल्यके।



गतासुरभवत्; तस्या मुखे हासस्तदाप्यभूत्।। १८९।।
तस्याः शवं दृष्टमत्र नद्यां; तस्यास्तरंगिणी।
हृदि ज्वलत्स्फुलिंगस्य सन्तापं शमयेन्न नु?।। १९०।।
वसन्तपञ्चमितिथौ बकुळस्य सुमान्यधः।
पतितुं निशि कौमुद्याः परागे मिश्रिते सति।। १९१।।
चित्ते विमूकं सङ्कीर्तनालापे मिश्रिते सति।
उद्याने हिमबिन्दूनां मजपमालां स्पृशत्यपि।। १९२।।
अर्धरात्रे कुमुदिनीमध्यके रिष्टिचञ्चला।
विद्युल्लता पुळकिता सततं सञ्चलिष्यति।। १९३।।
भित्तिद्वयस्य मध्ये तु सलिलं चोत्पतिष्यति।
तस्मिन् शमिष्यति व्यक्ता जलशान्तिर्भविष्यति।। १९४।।
जलमध्येऽञ्जलिः काचिदुन्नतिं च भविष्यति।
तदन्तरे पूर्णदुग्धकुम्भश्चाप्युत्पतिष्यति।। १९५।।
प्रभाते पतितः सोऽपि चाप्रत्यक्षं भविष्यति।
तथापि तस्य स्थाने तु कुमुदं प्रहसिष्यति।। १९६।।
दळानि सम्पूर्णदुग्धधवळं परिभासते।
काण्डौ च पुष्पफलयोर्हस्ताञ्जलिसमानकौ।। १९७।।
एतद्दृष्ट्वा पूर्णिमानं प्राप्तुमायाति सन्ततम्।
समस्या जीवितस्यैवं पूरयत्यहरञ्जसा।। १९८।।

★